# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय १०५

ततो वैश्रवणो राजा यमश्चामित्रकर्शनः ।
सहस्राक्षो महेन्द्रश्च वरुणश्च परन्तपः ॥ १॥

षडर्धनयनः श्रीमान्महादेवो वृषध्वजः ।
कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः ॥ २॥

एते सर्वे समागम्य विमानैः सूर्यसंनिभैः ।
आगम्य नगरीं लङ्कामभिजग्मुश्च राघवम् ॥ ३॥

ततः सहस्ताभरणान्प्रगृह्य विपुलान्भुजान् ।
अब्रुवंस्त्रिदशश्रेष्ठाः प्राञ्जलिं राघवं स्थितम् ॥ ४॥

कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां वरः ।
उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने ।
कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे ॥ ५॥

ऋतधामा वसुः पूर्वं वसूनां च प्रजापतिः ।
त्वं त्रयाणां हि लोकानामादिकर्ता स्वयम्प्रभुः ॥ ६॥

रुद्राणामष्टमो रुद्रः साध्यानामपि पञ्चमः ।
अश्विनौ चापि ते कर्णौ चन्द्रसूर्यौ च चक्षुषी ॥ ७॥

अन्ते चादौ च लोकानां दृश्यसे त्वं परन्तप ।
उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ॥ ८॥

इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः ।
अब्रवीत्त्रिदशश्रेष्ठान्रामो धर्मभृतां वरः ॥ ९॥

आत्मानं मानुषं मन्ये रामं दशरथात्मजम् ।
योऽहं यस्य यतश्चाहं भगवांस्तद्ब्रवीतु मे ॥ १०॥

इति ब्रुवाणं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः ।
अब्रवीच्छृणु मे राम सत्यं सत्यपराक्रम ॥ ११॥

भवान्नारायणो देवः श्रीमांश्चक्रायुधो विभुः ।
एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् ॥ १२॥

अक्षरं ब्रह्मसत्यं च मध्ये चान्ते च राघव ।
लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः ॥ १३॥

शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः ।
अजितः खड्गधृग्विष्णुः कृष्णश्चैव बृहद्बलः ॥ १४॥

सेनानीर्ग्रामणीश्च त्वं बुद्धिः सत्त्वं क्षमा दमः ।
प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः ॥ १५॥

इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत् ।
शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ॥ १६॥

सहस्रशृङ्गो वेदात्मा शतजिह्वो महर्षभः ।
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः परन्तप ॥ १७॥

प्रभवं निधनं वा ते न विदुः को भवानिति ।
दृश्यसे सर्वभूतेषु ब्राह्मणेषु च गोषु च ॥ १८॥

दिक्षु सर्वासु गगने पर्वतेषु वनेषु च ।
सहस्रचरणः श्रीमाञ्शतशीर्षः सहस्रधृक् ॥ १९॥

त्वं धारयसि भूतानि वसुधां च सपर्वताम् ।
अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगः ॥ २०॥

त्रीँल्लोकान्धारयन्राम देवगन्धर्वदानवान् ।
अहं ते हृदयं राम जिह्वा देवी सरस्वती ॥ २१॥

देवा गात्रेषु लोमानि निर्मिता ब्रह्मणा प्रभो ।
निमेषस्तेऽभवद्रात्रिरुन्मेषस्तेऽभवद्दिवा ॥ २२॥

संस्कारास्तेऽभवन्वेदा न तदस्ति त्वया विना ।
जगत्सर्वं शरीरं ते स्थैर्यम् ते वसुधातलम् ॥ २३॥

अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षण ।
त्वया लोकास्त्रयः क्रान्ताः पुराणे विक्रमैस्त्रिभिः ॥ २४॥

महेन्द्रश्च कृतो राजा बलिं बद्ध्वा महासुरम् ।
सीता लक्ष्मीर्भवान्विष्णुर्देवः कृष्णः प्रजापतिः ॥ २५॥

वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् ।

तदिदं नः कृतं कार्यं त्वया धर्मभृतां वर ॥ २६ ॥

निहतो रावणो राम प्रहृष्टो दिवमाक्रम ।
अमोघं बलवीर्यं ते अमोघस्ते पराक्रमः ॥ २७ ॥

अमोघास्ते भविष्यन्ति भक्तिमन्तश्च ये नराः ।
ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् ॥ २८ ॥

ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥ २९ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com